# INTRODUCTION TO SANSKRIT LANGUAGE

**Dr.Justin George**
**Asst.Professor, Department of Sanskrit**
**Little Flower College Guruvayoor**

**MA MALAYALAM THIRD SEM.**
**COURSE TO SANSKRIT BEGINNERS**

## sanskrit alphabet

अ आ इ ई उ ऊ

ए ऐ ओ औ

ऋ ॠ ऌ अं अः

क ख ग घ ङ

च छ ज झ ञ

ट ठ ड ढ ण


त थ द ध न

प फ ब भ म

य र ल व

श ष स ह

# मात्रा



- संस्कृतम् – स् अं स् क् ऋ त् अं
- अ ह् अम्
- पुस्तकम् – प् उ स् त् अ क् अं
- ल् ए ख् अ न् ई

- प् उ ष् प् अं
- क् अ म् अ ल् अं
- अ त् र् अ
- क् उ त् र् अ

- मम नाम .............
- तव नाम.........
- अहम् संस्कृतम् पठामि।
- अहम् मलयालम् लिखामि।
- सः गृहम् गच्छति।
- सा गृहम् गच्छति।
- त्वम् भोजनं खादसि।
- त्वम् पाठं पठसि।

# केचन शब्दाः

- बालः बालिका बालकः लता रामः
- रमा फलम् काननम् ज्येष्ठः अनुजः
- वृक्षः भोजनम् कविः राजन् गुरुः सीता
- वनम् रेणुका
- पठति गच्छति लिखति पश्यति

# वचनानि लिङ्गानि च

| लिङ्गः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुल्लिङ्गः | बालः | बालौ | बालाः |
| स्त्रीलिङ्गः | बालिका | बालिके | बालिकाः |
| नपुंसकलिङ्गः | फलम् | फले | फलानि |

# गृहकार्यम्

- काकः - -
- वृक्षः - -
- पाठः - -
- लता - -
- माला - -
- वनम्
- पत्रम्

# पुरुषाः (PERSONS)

- प्रथमपुरुषः – सः तौ ते ,सा ते ताः,तत् ते तानि  बालः बालौ बालाः, लता लते लताः etc…..
- मध्यमपुरुषः – त्वम्  युवाम्  यूयम्।
- उत्तमपुरुषः  - अहम् आवाम् वयम्

# VERBS ACCORDING TO PERSONS

| पुरुषः | एक | द्वि | बहु |
|---|---|---|---|
| प्रथम | पठति | पठतः | पठन्ति |
| मध्यम | पठसि | पठथः | पठथ |
| उत्तम | पठामि | पठावः | पठामः |

# गृहकार्यम्

- लिख्
- खाद्
- पच्
- गम् (गच्छ्)

| | | | |
|---|---|---|---|
| **प्रथमपुरुषः** | **बालः पठति** | **बालौ पठतः** | **बालाः पठन्ति** |
| | सः लिखति | तौ लिखतः | तौ लिखन्ति |
| | लता क्रीडति | लते क्रीडतः | लताः क्रीडन्ति। |
| मध्यमपुरुषः | त्वम् पठसि | युवां पठथः | यूयम् पठथ |
| | त्वम् लिखसि | युवां लिखथः | यूयम् लिखथ |
| | त्वम् क्रीडसि | युवां क्रीडथः | यूयम् क्रीडथ |
| उत्तमपुरुषः | अहम् पठामि | आवां पठावः | वयम् पठामः |
| | अहम् लिखामि | आवां लिखावः | वयम् लिखामः |

# HOME WORK ASSESSMENT

- I AM STUDYING- अहम् पठामि।
- WE ALL R STUDYING- वयम् पठामः।
- HE IS WRITING- सः लिखति।
- THEY R PLAYING- ते क्रीडन्ति।
- YOU R GOING- त्वम् गच्छसि।
- YOU BOTH R WRITING- युवां लिखथः।
- THEY BOTH R PLAYING- तौ क्रीडतः।
- WE BOTH R COOKING- आवां पचावः।
- YOU BOTH R GOING- युवां गच्छथः
- WE ALL R GOING- वयम् गच्छामः

# क्रियाः कालभेदाः च

- लट् वर्तमाने – पठति........
- भूते लङ्     - अपठत्
- भविष्यार्थे लृट् – पठिष्यति
- Discussion.
- क्रीड्, गम्, पच्,

# पठ् धातु लङ् (भूतकालः)

| परुषः | एक | द्वि | बहु |
|---|---|---|---|
| प्रथम | अपठत् | अपठतां | अपठन् |
| मध्यम | अपठः | अपठतम् | अपठत |
| उत्तम | अपठम् | अपठाव | अपठाम |

# पठ् धातु लृट्

| पुरुषः | एक | द्वि | बहु |
|---|---|---|---|
| प्रथम | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यम | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तम | पठिष्यामि | पठिष्यावः | पठिष्यामः |

# सर्वनाम:

- सः तौ ते
- सा ते ताः
- तत् ते तानि

# CASES-


sanskrit
SuccessCDs
Lesson 2
Vibhakti
विभक्तियाँ
Learn Sanskrit
Grammar

# CASES-विभक्तयः

| विभक्ति | एकवचन | द्विवचन | वहुवचन् |
|---|---|---|---|
| प्रथमा | वृक्ष: | वृक्षौ | वृक्षा: |
| द्वतीया | वृक्षम् | वृक्षौ | वृक्षान् |
| त्रतीया | वृक्षेन् | वृक्षेभ्याम् | वृक्षै: |
| चतुर्थी | वृक्षाय | वृक्षेभ्याम् | वृक्षेभ्य: |
| पञ्चमी | वृक्षात् | वृक्षेभ्याम् | वृक्षेभ्य: |
| षष्ठी | वृक्षस्य | वृक्षयो: | वृक्षानाम् |
| सप्तमी | वृक्षे | वृक्षयो: | वृक्षेषु |
| संबोधन | हे वृक्ष ! | हे वृक्षौ ! | हे वृक्षा ! |

| विभक्ति | एकवचन | द्विवचन | वहुवचन् |
|---|---|---|---|
| प्रथमा | बालक: | बालकौ | बालका: |
| द्वतीया | बालकम् | बालकौ | बालकान् |
| त्रतीया | बालकेन् | बालकेभ्याम् | बालकै: |
| चतुर्थी | बालकाय | बालकेभ्याम् | बालकेभ्य: |
| पञ्चमी | बालकात् | बालकेभ्याम् | बालकेभ्य: |
| षष्ठी | बालकस्य | बालकयो: | बालकानाम् |
| सप्तमी | बालके | बालकयो: | बालकेषु |
| संबोधन | हे बालक! | हे बालकौ! | हे बालका! |

# MEANING OF 7 CASES

1प्रथमा-NO PARTICULAR MEANING

2-TO, 3-BY, 4-FOR,5- FROM, 6-OF('S),7-IN

सं. प्र- हे(TO CALL SOMEONE)

2/4 FROM OF IN

# MEANING OF 7 CASES

| Cases (विभक्तयः) | Function | Prepositions | Example |
|---|---|---|---|
| प्रथमा (Nominative) | कर्ता (Subject) | - | देवः अस्मान् रक्षति । |
| द्वितीया (Accusative) | कर्म (Object) | To | अहं देवं नमामि । |
| तृतीया (Instrumental) | करणम् (Instrument) | By/With/Through | राक्षसाः देवेन ताडिताः । |
| चतुर्थी (Dative) | सम्प्रदानम् (Receiver) | To/ For | अहं देवाय दुग्धम् आनयामि । |
| पञ्चमी (Ablative) | अपादानम् (Point of separation) | From | अहं देवात् वरान् प्राप्नोमि । |
| षष्ठी (Genitive) | सम्बन्धः (Possession/ Relation) | Of/'s | देवस्य कीर्तिः अद्वितीया । |
| सप्तमी (Locative) | अधिकरणम् (Location) | In/On/At/Among | सर्वं जगत् देवे एव अस्ति । |
| संबोधनम् (Vocative) | सम्बोधनम् (To address someone) | O! | हे देव, रक्ष माम् । |

# SECOND CASE. द्वितीया विभक्ति. EXAMPLES

- रामः पशुम् ताडयति।
- मार्जारः मूषकम् पीडयति।
- बालः जलम् पिबति।
- रामः रावणम् हतवान्।
- राजा जनान् पालयति।
- अध्यापकः छात्रान् पाठयति।
- छात्रः पाठं पठति।
- छात्राः पाठान् पठन्ति।

# SECOND CASE. द्वितीया विभक्ति. EXAMPLES

- भटः चोरम् तर्जयति।
- भटाः चोरान् तर्जयन्ति।
- युवकः वृक्षम् आरोहति।

# तृतीया

- कविः तूलिकया लिखति।
- सः कलमेन लिखति।
- मनुष्यः पादाभ्यां चरति।
- अहम् पादाभ्यां चलामि।
- वयम् पादैः चलामः।
- बालकः कन्दुकेन क्रीडति।
- सः हस्तेन कार्यम् करोति।
- वयम् नेत्रैः पश्यामः।
- अहम् नेत्राभ्याम् पश्यामि।

# चतुर्थी

- अध्यापकः छात्राय विद्याम् ददाति।
- गुरुः शिष्येभ्यः पुस्तकं ददाति।
- माता पुत्राभ्याम् मोदकं ददाति।
- वृक्षः वृक्षाय न फलति।

# पञ्चमी

- ते विद्यालयात् आगच्छन्ति।
- सः गृहात् विद्यालयम् गच्छति।
- वृक्षात् फलम् पतति।
- नेत्राभ्यां अश्रुबिन्दवः पतन्ति।
- हस्तात् पुस्तकम् पतति।

# षष्ठी

- वृक्षस्य शाखायां वानरः अस्ति।
- मम विद्यालयस्य नाम................।
- मम गृहस्य नाम...........।
- मम मित्रस्य नाम......................।
- तव अनुजस्य नाम.................।
- पर्वतयोः मध्ये गर्तम् विद्यते।
- हिमालयः पर्वतानां राजा भवति।

# सप्तमी

- बालिका गृहे अस्ति।
- पर्वते धूमः दृश्यते।
- मार्गेषु यानानि सन्ति।
- खगाः वृक्षेषु वसन्ति।
- मम हस्ते पुस्तकम् अस्ति।
- अहम्  लिटिल् फ्लवर् कलालये पठामि।
- त्वम् लिटिल् फ्लवर् कलालये पठसि।
- वयम् सर्वे मलयालविभागे पठामः।

# SPECIFIC USES OF SKT. CASES

**तृतीया**— अलम्, सह, विना इत्यादि के योग में—

1. **अलं** कोलाहलेन।
2. दीपिका भ्रात्रा **सह** गमिष्यति।
3. रामेण **विना** सीता अयोध्यायां न वसति।

**चतुर्थी**— अलम्,* नमः, स्वाहा, स्वस्ति इत्यादि के योग में—

1. रामः रावणाय **अलम्**।
2. देवेभ्य **नमः**।
3. अग्नये **स्वाहा**।
4. सर्वेभ्यः **स्वस्ति**।

**पञ्चमी**— पूर्वम्, अनन्तरम्, बहिः, ऋते, विना इत्यादि के योग में—

1. ग्रामात् **बहिः** देवालयः अस्ति।
2. भोजनात् **अनन्तरं** जनकः भ्रमणाय गच्छति।
3. भोजनात् **पूर्वम्** सः हस्तौ प्रक्षालयति।
4. अरविन्दात् **ऋते** सर्वे उत्तीर्णाः।
5. परिश्रमात् **ऋते** विना सफलता न लभ्यते।

**षष्ठी**— उपरि, अधः, पश्चात्, पुरतः, पृष्ठतः इत्यादि के योग में—

1. भवनस्य **उपरि** राष्ट्रध्वजः शोभते।
2. भूमेः **अधः** जलम् अस्ति।
3. भोजनस्य **पश्चात्** अहं विश्रामं करोमि।
4. गृहस्य **पुरतः** रम्या वाटिका।
5. विद्यालयस्य **पृष्ठतः** उन्नताः वृक्षाः सन्ति।

**सप्तमी**— निपुण, कुशल, प्रवीण, विश्वास, स्नेह इत्यादि के योग में—

1. दीप्तिः नृत्यकलायां निपुणा।
2. राहुलः चित्रकलायां प्रवीणः।
3. राहुले अध्यापकस्य विश्वासः अस्ति।
4. मातुः स्नेहः पुत्रे अस्ति।

# SPECIFIC USES OF SKT. CASES

- जलम् विना मत्स्याः न जीवन्ति।
- भोजनम् विना जीवनं असाध्यं भवति।
- गृहम् परितः वृक्षाः सन्ति।,अभितः, उभयतः
- विद्यालयं परितः उद्यानं वर्तते।
- रामेण सह सीता वनम् अगच्छत्।

# SPECIFIC USES OF SKT. CASES

- मात्रा साकं अहम् विद्यालयम् गच्छामि।
- पित्रा सार्धं वयम् आपणं गच्छामः।
- मया समं अनुजः क्रीडति।
- बालकेभ्यः मोदकं रोचते
- तुभ्यम् कथा रोचते।
- मह्यम् संस्कृतपठनं रोचते।
- पिता पुत्राय लेखं लिखति।
- गृहात् बहिः मार्गः अस्ति।
- विद्यालयात् बहिः वृक्षाः सन्ति।

# SPECIFIC USES OF SKT. CASES

- शिवाय नमः।
- गुरवे नमः।
- बालिका पुष्पेभ्यः स्पृहयति।
- शिशुः मार्जारात् बिभेति।
- सूर्यात् ऋते कः अन्धकारम् नाशयति?

# भू धातु लट्-भव्

| पुरुषः | एक | द्वि | बहु |
|---|---|---|---|
| प्रथमा | भवति | भवतः | भवन्ति |
| मध्यम | भवसि | भवथः | भवथ |
| उत्तम | भवामि | भवावः | भवामः |

# अस् धातू लट्

| पुरुषः | एक | द्वि | बहु |
| --- | --- | --- | --- |
| प्रथमा | अस्ति | स्तः | सन्ति |
| मध्यम | असि | स्थः | स्थ |
| उत्तम | अस्मि | स्वः | स्मः |

# गम् धातु लट्-गच्छ्

| | एक | द्वि | बहु |
|---|---|---|---|
| प्र पु | **गच्छति** | **गच्छतः** | **गच्छन्ति** |
| म,पु | **गच्छसि** | **गच्छथः** | **गच्छथ** |
| उ.पु | **गच्छामि** | **गच्छावः** | **गच्छामः** |

# उपसर्गाः

- प्र. परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, परि, आ .....
- हरति-
- प्रहरति
- आहरति
- संहरति
- विहरति
- परिहरति

# संख्याः-

- एकः, एका, एकम्
- द्वौ, द्वे, द्वे
- त्रयः, तिस्रः, त्रीणि
- चत्वारः, चतस्रः, चत्वारि
- पञ्च, षट् , सप्त, अष्ट , नव, दश

# त्रिषु लिंगेषु संख्यावाचकशब्दाः

| पुल्लिङ्गः | स्त्रीलिंगः | नपुंसकलिंगः |
|---|---|---|
| एकः बालकः | एका बालिका | एकम् फलम् |
| एकः वृक्षः | एका लता | एकम् पत्रम् |
| द्वौ बालकौ | द्वे बालिके | द्वे फले |
| द्वौ वृक्षौ | द्वे लते | द्वे पत्रे |
| त्रयः बालकाः | तिस्रः बालिकाः | त्रीणि फलानि |
| त्रयः वृक्षाः | तिस्रः लताः | त्रीणि पत्राणि |
| चत्वारः बालकाः | चतस्रः बालिकाः | चत्वारि फलानि |

# विशेषणानि विशेष्याणि च

- कृष्णः मातुलम् कंसम् हतवान्।
- राक्षसराजेन रावणेन सीता अपहृता।
- दीनाय भिक्षुकाय भोजनम् ददाति।
- छिन्नात् घटात् जलम् निर्गच्छति।
- लक्ष्मणः ज्येष्ठस्य रामस्य साहाय्यम् अकरोत्।
- विमले जले मत्स्याः विहरन्ति।

# प्रश्नवाचकशब्दाः

- कः कौ के –WHO, WHAT,WHICH
- का के काः
- किम् के कानि
- कम् – कान् – TO WHOM
- केन – कैः- BY WHOM BY WHAT
- कया – केभ्यः- FOR WHOM , FOR WHAT
- कस्मात् – केभ्यः:FROM WHOM , FROM WHAT
- कस्य – केषाम् – WHOSE, OF WHOM
- कस्मिन् – केषाम् – IN WHOM , IN WHAT

# प्रश्नवाचकशब्दा:

- कुत्र - WHERE
- कुत:- FROM WHERE, WHY
- किमर्थम् – FOR WHAT
- कति – HOW MANY
- कदा - WHEN
- कथम् - HOW
- कीदृश: – WHAT TYPE OF

# SVO/.......SOV....खगाः

- **This is a garden. There are many creepers and trees in the garden. Trees are shining with branches and sub-branches. Trees and creepers are shining with flowers. Birds are sitting on the branches of the trees. One boy is climbing the treee. Two boys are climbing other tree. One another boy climbing down the tree. There  is playing facility for the children in the garden. Gardner keeps the garden. People come to the garden in the evening. At the sunset people go back from garden.**

## TRANSLATION- भाषान्तरीकरणम्

इदम् उद्यानम् भवति। उद्याने तरवः लताः च सन्ति। तरवः शाखाभिः उपशाखाभिः च शोभन्ते। वृक्षाः लताः च कुसुमैः शेभन्ते। वृक्षाणां शाखासु खगाः उपविशन्ति। एकः बालः वृक्षम् आरोहति। द्वौ बालौ अन्यम् वृक्षम् आरोहतः। अपरः कश्चन बालः वृक्षात् अवरोहति। उद्याने बालानां क्रीडासौकर्यं अस्ति। उद्यानपालकः उद्यानं रक्षति। जनाः सायंकाले उद्यानम् गच्छन्ति। सूर्यस्य अस्तमये जनाः उद्यानात् प्रतिनिवर्तन्ते।

# प्रश्नानि

1. उद्याने के के सन्ति?
2. तरवः कैः शोभन्ते?
3. कुसुमैः के शोभन्ते?
4. बालौ किम् कुरुतः?
5. उद्याने किम् अस्ति?
6. कः उद्यानम् रक्षति?
7. जनाः कदा उद्यानम् गच्छति?
8. जनाः कदा उद्यानात् प्रतिनिवर्तन्ते?

# TRANSLATION- भाषान्तरीकरणम्

गजः मृगेषु महाकायः भवति। तस्य स्थाणवः इव चत्वारः स्थूलाः पादाः सन्ति। तस्य कर्णौ शूर्पौ इव विशालौ स्तः। तस्य नेत्रे कृशे भवतः। परन्तु ताभ्यां सः भूमौ स्थितां सूचिकाम् अपि पश्यति। लम्बमानः तस्य करः नासिका एव। ताम् शुण्डा इति वयम् व्यवहरामः। शुण्डायाः अग्रे द्वे विवरे स्तः।ताभ्यां सः जलम् गृहीत्वा वक्त्रेण पिबति। अत एव गजस्य द्विप इति संज्ञा। गजस्य शृङ्गवत् दृश्यमानौ द्वौ दीर्घौ दन्तौ स्तः। गजानां दन्ताः बहुमूल्याः भवन्ति। गजाः दुष्कराणि कर्माणि कुर्वन्ति। गजाः पर्णादीनि खादन्ति। इक्षुकाण्डेषु तस्य महती प्रीतिः अस्ति। गजस्य स्त्री करेणुः भवति।

- **Elephant is the biggest animal . It has four fat legs like pillars. Its two ears are very big like winnowing baskets. Its eyes are small. But with that it can see even a needle on the earth. Its nose is his lengthy hand. We call it as trunk. There are two holes at the edge of trunk. Having taken water with that it drinks wih its mouth. That's why it is called as Dvipa.Elephant has two long teeth look like horns. So its name is Danthvala. Its horns are very expensive. Elephants do very hardworks. Elephant eat leaves. It like sugar cane very much. She elephant is caleed as karenu. It doesn't have long teeth.**

# प्रश्नानि

1.गजः मृगेषु कीदृशः भवति

2.गजस्य पादाः कीदृशाः भवन्ति

3.गजस्य कति पादाः सन्ति

4.गजस्य कर्णौ कीदृशौ स्तः

5.गजस्य नेत्रे कीदृशे भवतः

6.गजः कानि खादति

7.गजस्य केषु महती प्रीतिः अस्ति

8.गजस्य स्त्री का भवति

# आदिकविः वाल्मीकिः

श्रीवाल्मीकिः रामायणस्य कर्ता भवति। वाल्मीकिः आदिकविः इति रामायणम् आदिकाव्यम् इति च भारतीयानां विश्वासः। रामायणे श्रीरामस्य कथा विस्तरेण वर्णिता। आदिकाव्यकर्ता अयं मुनिपुङ्गवः पूर्वम् कश्चन तस्करः आसीद् इति ऐतिह्यम्। तस्करः सः पथिकेभ्यो धनम् अपहृत्य स्वकुटुम्बम् पुपोष। एकदा सः मार्गगतान् ऋषीन् संरुध्य तेषां वल्कलान्यपहर्तुम् उद्यतः। ऋषयः तम् अवदन्-भोस्तस्कर, त्वम् पापमाचरसि। अपि तव कुटुम्बमपि अस्य पापस्याः अंशं भजते। तस्करः गृहम् गत्वा पत्नीं पुत्रान् च मिलित्वा प्रत्यागतः दुःखितः अवदत्- भोस्तपस्विनः, मम कुटुम्बम् मम पापस्याः अंशं न भजते। रक्ष मां पापादस्मात्। इति। ऋषीणाम् उपदेशेन सः तपश्चकार। चिरकानम् समाधौ स्थितम् तं वल्मीकः आच्छादयामास। वल्मीकं भित्वा बहिरागतः सः वाल्मीकिरिति प्रथितो बभूव।

# प्रश्नानि

- रामायणस्य कर्ता कः?
- भारतीयानां विश्वासः कः?
- रामायणे का विस्तरेण वर्णिता?
- आद्काव्यकर्ता पूर्वं कः आसीत्?
- तस्करः कथं कुटुम्बम् पुपोष?
- ऋषयः तस्करम् किम् अवदन्?
- ऋषीणां उपदेशेन तस्करः किम् अकरोत्?
- वल्मीकिरिति प्रथितो बभूव- कः कथम्?

सङ्कथय्य, ९. कथयितुम् ।

## ६. काव्यकथा

### रघुमहाराजस्य त्यागः

दिलीपः वृद्धः सञ्जातः । सः भार्यया सह वनम् अगच्छत्, । वानप्रस्थाश्रमं स्वीकृतवान् । रघुः सिंहासनम् आरूढवान् । ततः सः दिग्विजयं कृतवान् । सर्वान् देशान् जितवान् । दिग्विजयानन्तरं रघुः 'विश्वजिद्'यागं कृतवान् । तस्मिन् यागे सर्वस्वं दक्षिणा भवति । रघुमहाराजः सर्वस्य दानं कृतवान् । तस्य कोशः निःशेषः कृतः ।

कौत्सः तपस्विकुमारः । सः वरतन्तुमुनेः शिष्यः । सः रघुमहाराजस्य समीपं गुरवे दानार्थं धनं प्रष्टुम् आगतवान् । रघुः मृत्तिकापात्रेण अर्घ्यं दत्तवान् । तेन एव कौत्सः विषयं ज्ञातवान् । रघुः क्षेमं पृष्टवान् । आगमनकारणं च अपृच्छत् । कौत्सः अवदत्-'गुरुदक्षिणा मया दातव्या । त्वम् इदानीं निर्धनः । याचनं न युक्तम् । कालम् अतिक्रम्य अहम् आगतवान् । अन्यं पृच्छामि' इति । रघुः- 'गुरवे कियत् धनं दातव्यम् ?' इति पृष्टवान् । कौत्सः स्वकथां कथितवान् - ''मम अध्ययनं समाप्तम् । ततः अहं गुरुदक्षिणा का ? इति गुरुं पृष्टवान् । गुरुः उक्तवान् -'दक्षिणा मास्तु । भक्त्या एव अहं सन्तुष्टः' इति । अहम् आग्रहं कृतवान् । गुरुः कुपितः । 'चतुर्दशकोटिपरिमितं सुवर्णं दीयताम्' इति उक्तवान् । अहं दरिद्रः । कथम् आनयामि ? अतः अत्र आगतवान् । त्वं निर्धनः, अन्यत्र गच्छामि'' इति ॥

रघुराजः 'अन्यत्र गमनं मास्तु । यदि अहं धनं न ददामि तर्हि मम अपवादः भवति । अत्र एव वासं कुरु । कथञ्चित् धनं सम्पादयामि' इति अकथयत् ।

अन्यस्मिन् दिने रघुः कुबेरात् धनं ग्रहीतुं प्रस्थितवान् । किन्तु कोषे

# सन्धिः-स्वरसन्धिः-दीर्घसन्धिः

- धर्म + अर्थः- धर्मार्थः
- वेद अन्तः – वेदान्तः
- च अपि –चापि
- हिम आलयः –हिमालयः
- दया आनन्दः – दयानन्दः
- सिंह + आसने - सिंहासने

# सन्धिः-स्वरसन्धिः-दीर्घसन्धिः

- मुनि + इन्द्रः – मुनीन्द्रः
- कवि + इन्द्रः कवीन्द्रः
- गिरि + ईशः – गिरीशः
- श्री + ईशः – श्रीशः
- गुरु + उपदेशः – गुरूपदेशः
- भानु + उदयः – भानूदयः
- सु + उक्तिः – सूक्तिः
- वधु + उक्तिः - वधूक्तिः

# सन्धिः-स्वरसन्धिः-गुणसन्धिः

- देव + इन्द्रः – देवेन्द्रः    अ + इ = ए  व् अ  - इ
- उप + इन्द्रः – उपेन्द्रः
- नर + इन्द्रः – नरेन्द्रः
- सुर + ईशः – सुरेशः
- सूर्य + उदयः – सूर्योदयः  अ उ - ओ
- चन्द्र उदयः चन्द्रोदयः
- पुरुष उत्तमः - पुरुषोत्तमः

# वृद्धि सन्धिः

- तव + एव – तवैव अ/आ + ए = ऐ कै, तै, पै
- मम + एव - ममैव
- सदा + एव - सदैव
- तथा + एव – तथैव
- तव ऐश्वर्यम् – तवैश्वर्यम् अ + ऐ = ऐ
- मम ओषधिः – ममौषधिः अ ओ औ
- जन औदार्यम् - जनौदार्यम्

# पूर्वरूपसन्धि

- को + अत्र = कोऽत्र
- साधो +अत्र = साधोऽत्र ऽ - प्रश्लेषम्
- भावो +अत्र =भावोऽत्र
- जले +अत्र =जलेऽत्र
- वने+ अत्र =वनेऽत्र
- राज्ये+ अभिषेक्तुम् =राज्येऽभिषेक्तुम्

# अयादि सन्धि

- ने + अनम् = नयनम्
- नै अकः – नायकः,  गै अकः  गायकः
- पौ अकः- पावकः   प् आव् अकः - पावकः
- ए  ओ  ऐ  औ
- अय् अव् आय्  आव्
- वागर्थाविव – वागर्थ् आव्   इव

# विसर्गसन्धि

- कः + अपि - कोऽपि----कः अपि
- सः अपि - सोऽपि
- रामः अवदत् - रामोऽवदत्
- सः अभवत् - सोऽभवत्
- परिलाल्यमानः अपि - परिलाल्यमानोऽपि

# विसर्गसन्धि

- भानुः + अयम् - भानुरयम्   र् + अ - र
- कविः इति - कविरिति
- गुरुः अवदत् - गुरुरवदत्
- गुरुः उक्तम् - गुरुरुक्तम्
- नृपतेः अनुज्ञया - नृपतेरनुज्ञया
- नृपतेः अपि - नृपतेरपि

- मुनिः + यत्र - मुनिर्यत्र ---- मुनिर्  यत्र -
- शिशुः + हसति - शिशुर्हसति

# विसर्गसन्धि

- मनः + तापः = मनस्तापः
- प्रोषितयोः+ तयोः = प्रोषितस्तयोः

## बालरामायणम्- ।।अयोध्याकाण्डः।।

अयोध्याख्ये तु गुर्वर्थे त्यक्त्वा राज्यम् गिरौ वसन्।
पादुके भरतायादात् स राम: शरणं मम।।

अयोध्या + आख्ये, भरताय + अदात्

## बालरामायणम्- ।।अयोध्याकाण्डः।।

१.कृतोद्वाहं भागिनेयं भरतं स्वगृहम् नेतुकामो युधाजिदयोध्यां प्रपेदे। नृपतेरनुज्ञया भरतः शत्रुघ्नेनानुगतो मातुलगृहं प्रययौ। तत्र च मातुलेन पुत्रस्नेहेन परिलाल्यमानोऽपि स सन्ततं जरठं जनकमेव मनसा स्मरन्नवर्तत। नृपतेरपि प्रोषितयोस्तयोस्तनययोरुत्सुकं हृदयमासीत्।

# बालरामायणम्- ।।अयोध्याकाण्डः।।

- कृत + उद्वाहम्
- युधाजित् + अयोध्यां
- नृपतेः + अनुज्ञया
- शत्रुघ्नेन + अनुगतो
- स्मरन् +अवर्तत
- नृपतेः +अपि
- प्रोषितयोः + तयोः + तनययोः + उत्सुकम्
- हृदयम् + आसीत्

# बालरामायणम्- ।।अयोध्याकाण्डः।।

२.अत्रान्तरे नरपतिः सचिवैः पौरैश्च संमन्त्र्य सर्वगुणानामाकरम् प्रजानामनुरागभाजनमात्मनश्च प्रियतमं रामचन्द्रम् यौवराज्येऽभिषेक्तुम् अचीकत। प्रजाश्च रामस्याभिषेकम् सर्वात्मना स्पृहयामासुः। अभिषेकवार्ता कृत्स्नामयोध्यानगरीं प्रमोदसागरे प्लावयामास। गृहेषु चत्वरेषु रथ्यासु चतुष्पथेषु विपणिषु राजमार्गेषु च मण्डनविधिः समन्ततः प्रववृते। सर्वत्रापि रामाभिषेकस्य कथैव शुश्रुवे। । बालाः अपि संक्रीडमाना रामाभिषेकमधिकृत्यैव कथाः कथयामासुः

# बालरामायणम्- ॥अयोध्याकाण्डः॥

- अत्र अन्तरे
- पौरैः च
- सर्वगुणानाम् आकरम्
- प्रजानाम् अनुरागभाजनम् आत्मनः च
- यौवराज्ये अभिषेक्तुम् अचीकमत
- प्रजाः च
- कथा एव
- रामाभिषेकम् अधिकृत्य -एव

## बालरामायणम्- ।।अयोध्याकाण्डः।।

३.राजा सुमन्त्रम् संप्रेष्य राममानाययामास। पादयोः प्रणिपतन्तं रामं सप्रेमभरमाश्लिष्य राजा प्रजानामात्मनश्च तमभिलाषं तस्मै कथयामास। श्वो भावि रामचन्द्र, तव यौवराज्याभिषेक इति सानन्दमाचक्षाणस्य महीपतेराज्ञां शिरसा धारयन् रघुवरः स्वमन्दिरं निववृते। अभिषेकोचितम् च व्रतनियमं जगृहे।

# बालरामायणम्- ।।अयोध्याकाण्डः।।

- रामम् आनाययामास
- प्राजानाम् आत्मनः च
- महीपतेः आज्ञाम्

# बालरामायणम्- ॥अयोध्याकाण्डः॥

४. यदृच्छया प्रासादस्योपरितलमारूढा कैकेय्या दासी वपुषीव मनस्यपि कुटिला मन्थरा तादृशमयोध्यानगरे मण्डनविधिं साक्षात्कृत्य किं निमित्तोऽयमुत्सवारम्भ इति रामस्य धात्रीं पप्रच्छ। सा तस्यै रामाभिषेकं भाविनमाचचक्षे। श्रुत्वैव रामस्य विभूतिं कोपेन दह्यमाना सा पापहृदया शयानां कैकेयीं सत्वरमुपगम्य गरकलुषां गिरमेवमुज्जगार- उपस्थितमनर्थमबुध्वा किमेवं मुग्धा शेषे। अहो महीयसी ते विपदापतिता।

# बालरामायणम्- ।।अयोध्याकाण्डः।।

- प्रासादस्योपरितलमारूढा – प्रासादस्य -उपरितलम् –आरूढा वपुषी इव
- मनस्यपि- मनसि अपि
- तादृशमयोध्यानगरे- तादृशम्  अयोध्यानगरे
- निमित्तोऽ यमुत्सवारम्भ – निमित्तः अयम्  उत्सवारम्भ
- श्रुत्वैव – श्रत्वा- एव
- गिरमेवमुज्जगार- गिरम् - एवम् - उज्जगार

# बालरामायणम्- ।।अयोध्याकाण्डः।।

श्वो राजा रामं यौवराज्येऽभिषेक्ष्यति। रामेऽभिषिक्ते कौसल्या महतीमर्हणामवाप्स्यति। त्वां पुनः सर्वोऽपि लोकोऽनादरपात्रं करिष्यति। रामो राजा, भरतो दासश्च भविष्यतीति। रामाभिषेकस्य वार्तया प्रथमं प्रमुदितां कैकेयीं मुहुर्मुहुर्दुरुपदेशशतैर्मथ्नती मन्थरा कथमपि तस्य प्रातिकूल्यं प्रापयामास। साऽपि राममितो वनं प्रस्थापयिष्यामीति दारुणां प्रतिज्ञां चक्रे। तत्र चेममुपायं मन्थरा निजगाद।

- यौवराज्येऽभिषेक्ष्यति – यौवराज्ये - अभिषेक्ष्यति
- रामेऽभिषिक्ते – रामे - अभिषिक्ते
- महतीमहर्णामवाप्स्यति – महतीम् अर्हणाम् अवाप्स्यति
- सर्वोऽपि – सर्वः अपि
- लोकोऽनादरपात्रं – लोकः अनादरपात्रम्
- दासश्च – दासः च
- भविष्यतीति – भविष्यति इति
- मुहुर्मुहुर्दुरुपदेशशतैमर्थ्नती – मुहुः मुहुः दुरुपदेशशतैः मथ्नती
- चेममुपायं – च इमम् उपायम्
- सा अपि

# बालरामायणम्- ॥अयोध्याकाण्डः॥

५.पुरा किल देवासुरसंग्रामे शक्रसाहाय्यं कर्तुं गतो दशरथोऽनुगतायास्ते शुश्रूषया संतुष्टो वरद्वयं ते प्रायच्छत्।तच्च यदेच्छामि तदा ग्रहीष्यामीति तस्मिन्नेव सत्यप्रतिज्ञे त्वया न्यासीकृतमास्ते। तयोरेकेन चतुर्दशवत्सरान् रामस्य वने प्रव्राजनमन्येन भरतस्याभिषेचनं च याच्यतामीति । तथा प्रोत्साहिता कैकेयी कोपाविष्टेव क्रोधागारं प्रविश्य धरणीतले संविवेश। दशरथस्तु प्रेयस्यै प्रियवार्तामाख्यातुमिच्छन्नन्त:पुरं प्रविष्टस्तथाभूतां तामभिलक्ष्य भृशमुद्विग्नो बभूव।

# बालरामायणम्- ।।अयोध्याकाण्डः।।

- दशरथः अनुगतायाः ते
- तत् च
- यदा इच्छामि
- तयोः एकेन
- कोपाविष्टा इव
- दशरथः तु
- प्रियवार्ताम् आख्यातुम् इच्छन् अन्तःपुरं
- प्रविष्टः तथाभूतां
- भृशम् उद्विग्नो

## बालरामायणम्- ॥अयोध्याकाण्डः॥

६. अथ तां सान्त्वयितुकामो राजा, देवि! केन वा हेतुनैवं विमनीभूतासि इति बहुकृत्वः पर्यपृच्छत्। केनाभियुक्ताऽसि, केन वा विमानिताऽसीति भूयोभूयः परिपृच्छन्तं तं सा क्रूरहृदयैवं जगाद – राजन्! नाहं केनापि विप्रकृता विमानिता वाऽस्मि। अस्ति मे कश्चिदभिप्रायः । तं यदि करिष्यमाणं प्रतिजानीषे तर्हि व्याहरिष्यामि इति।

# बालरामायणम्- ।।अयोध्याकाण्डः।।

- हेतुना एवम्
- केन अभियुक्ता असि
- विमानिता असि इति
- क्रूरहृदया एवम्
- न अहम्
- वा अस्मि

# बालरामायणम्- ।।अयोध्याकाण्डः।।

७. तथेति कृतशपथं नरनाथं दत्तपूर्वं वरद्वयमुद्बोधयन्ती रामस्य प्रवासनं भरतस्याभिषेचनं च सा ययाचे। तस्याः सुदारुणं तद्वचनं निशम्यैव स महीपतिरशनिहत इव नष्टसंज्ञो बभूव। ततः कथमपि लब्धसंज्ञो राजा तथा तं निष्ठुरं निश्चयमुच्चावचैरुपदेशवचनैस्त्याजयितुं बहुधा प्रयेते। नरपतेस्तानि सामवचनानि पापहृदयायां तस्यामूषर इवोप्तानि बीजानि विफलानि परिणेमुः। सा तु यदि मदीयामभ्यर्थनामतिलङ्घ्य राममभिषेक्ष्यसि तर्हि नियतं पश्यत एव भवतः विषं वा पीत्वा पावके वा पतित्वा प्राणांस्त्यक्ष्यामीति सशपथं कथयामास। सत्यपाशेन नियन्त्रितः वरद्वयं प्रदातुं प्रत्याख्यातुमप्यपारयन्ननुतापपरवशो राजा बहुशो विलपितैस्तां रजनीं निर्निद्रो निनाय।

# बालरामायणम्- ॥अयोध्याकाण्डः॥

- तथा इति,      वरद्वयम् उद्बोधयन्ती
- भरतस्य अभिषेचनं
- निशम्य एव,       महीपतिः अशनिहत
- निश्चयम् उच्चावचैः उपदेशवचनैः त्याजयितुं
- इव उप्तानि ,     मदीयाम् अभ्यर्थनाम् अतिलङ्घ्य
- प्राणान् त्यक्ष्यामि इति
- प्रत्याख्यातुम् अपि अपारयन् अनुतापपरवशो
- विलपितैः ताम्

# बालरामायणम्- ।।अयोध्याकाण्डः।।

1. युधाजित् कः?
2. प्रोषितयोस्तनययोरुत्सुकं हृदयमासीत्। तनयौ कौ?
3. दशरथः कम् यौवराज्ये अभिषेक्तुमचीकमत?
4. कैकेय्याः दासी का?
5. वरद्वयं कः कस्यै प्रयच्छत्?
6. तां रजनीं निर्निद्रो निनाय- कः? कुतः?
7. रामाभिषेकवार्तां श्रुतवत्याः कैकेय्याः व्यापारान् विशदयत?
8. सा सशपथं कथयामास - का? किम् कथयामास ?

# Annotation....

- स सन्ततं जरठं जनकमेव मनसा स्मरन्नवर्तत।
- श्वो भावि रामचन्द्र, तव यौवराज्याभिषेक इति
- **उपस्थितमनर्थमबुध्वा किमेवं मुग्धा शेषे।**
- यदेच्छामि तदा ग्रहीष्यामीति तस्मिन्नेव सत्यप्रतिज्ञे त्वया न्यासीकृतमास्ते।
- केनाभियुक्ताऽसि, केन वा विमानिताऽसीति
- तं यदि करिष्यमाणं प्रतिजानीषे तर्हि व्याहरिष्यामि इति।
- तस्याः सुदारुणं तद्वचनं निशम्यैव स महीपतिरशनिहत इव नष्टसंज्ञो बभूव।